# Shri Bhagavannimbarkamahamunindra Ashtakam

# શ્રી ભગવન્નિમ્બાર્કમહામુનીન્દ્રાષ્ટકમ્

## Document Information

Text title : Shri Bhagavannimbarkamahamunindra Ashtakam

File name : bhagavannimbArkamahAmunIndrAShTakam.itx

Category : deities_misc, gurudev, nimbArkAchArya, aShTaka

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2023

*sanskritdocuments.org*

# Shri Bhagavannimbarkamahamunindra Ashtakam

# શ્રી ભગવન્નિમ્બાર્કમહામુનીન્દ્રાષ્ટકમ્

॥ શ્રી રાધાસર્વેશ્વરો વિજયતે ॥

॥ શ્રી ભગવન્નિમ્બાર્કાચાર્યાય નમઃ ॥

-ગોપાલસિંહો જિજ્ઞાસુ

સદા હંસં વન્દે તપસિ સનકાદીંશ્ચ નિરતાન્
 તતો વીણાપાણિં મુનિવર મહન્નારદમૃષિમ્ ।
સમુત્સાર્યાઽવિદ્યાં જનયતિ વિવેકં હૃદિ પરમ્
 ભજે નિમ્બાદિત્યં ભવભય-વિનાશાય સતતમ્ ॥ ૧॥

મહારાષ્ટ્રે “મૂઙ્ગી”-ત્યભિધ-નગરે પૈઠણયુતે
 સુનદ્યાઃ ગોદાયાઃ શુચિતમતટે કૃષ્ણ-વચનાત્ ।
“જયન્તી” ગર્ભાત્ શ્રીઅરુણમુનિગેહે સુવિમલે
 સ્વભક્તાનાં પ્રીત્યૈ હ્યજનિ નિયમાનન્દ વપુષા ॥ ૨॥

સમેષાં મન્ત્રાણામધિપતિરિહાષ્ટાદશ
 મિતાઽક્ષરૈર્યુક્તો મન્ત્રસ્તમધિગતવાન્નારદમુનેઃ ।
સનત્સેવ્યં ગુઞ્જાફલ-સદૃશ-ચક્રાઙ્કિતમસૌ
 તથા શાલિગ્રામં ભુવનધવસર્વેશ્વરમિમમ્ ॥ ૩॥

અવિદ્યાગ્રસ્તાનાં સરલપથમાશ્રિત્ય ગતયે
 અધોનિમ્બં દેવો ગિરિવર-સમીપે વ્રજભુવિ ।
શ્રુતિજ્ઞોઽનૂચાનો ગુણ-નિવહયુક્તો વિમલધીઃ
 સમાધિસ્થસ્તેપે વિગતભયકોપોઽમિત તપઃ ॥ ૪॥

દિવા-ભોજી દણ્ડી રહસિ નિયમાનન્દમવદત્
 પ્રસાદં યાચે ત્વામહનિ પરિગૃહ્ણામિ નિશિ ચ નો ।
પ્રદર્શ્યાર્કં નિમ્બે તદનુ યતયે નક્તમમુના
 પ્રદત્તં નિમ્બાર્કો યમ-નિયમ-વેત્તાઽભવદહો ॥ ૫॥

સ્વયં ધાતાઽઽયાતઃ કપટયતિવેશે ભ્રમયુતઃ
 વતારં ચક્રસ્ય પ્રખરમહસા સૂર્યશતકમ્ ।
તિરસ્કર્ત્તું શક્તં પ્રકૃતિપરિણામેન રહિતમ્
 પરિચ્છેત્તું ક્વેશો યમિહ તમહં સ્તૌમ્યભયદમ્ ॥ ૬॥

દશશ્લોકી શાસ્ત્રાગમ-નિગમ-તત્ત્વેન સહિતા
 પ્રપઞ્ચં માયાયાઃ પ્રણિગદતિ જીવં બહુવિધમ્ ।
પરબ્રહ્મજ્ઞાનં ગમયતિ સમાસાચ્ચ વિમલમ્
 પ્રણીતા યૈસ્તેભ્યો ભવભયહરેભ્યો મમ નમઃ ॥ ૭॥

દ્વયોર્ભાવો દ્વૈતં ન ભવતિ તદદ્વૈતમિતિ ચ
 ઇદં દ્વૈતાદ્વૈતં સકલભુવનેષ્વસ્તિ વિતતમ્ ।
મુનીન્દ્રો નિમ્બાર્કઃ શ્રુતિનિકરસારં પ્રકટયન્
 શશીવોચ્ચૈરાસ્તે હિ ભ-સદસિ વેદાન્તગગને ॥ ૮॥

ઇતિ શ્રી ભગવન્નિમ્બાર્કમહામુનીન્દ્રાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Bhagavannimbarkamahamunindra Ashtakam*
pdf was typeset on January 28, 2023

Please send corrections to *sanskrit@cheerful.com*